# DIET MALAPPURAM & VIJAYABHERI MALAPPURAM

## SSLC MODEL EXAMINATION , MARCH 2022

### SANSKRIT (SET-1)

TIME 1:30 hrs SCORE :40

निर्देशा: -

1. 20 निमेषाः समाश्वाससमयः ।प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
2. प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
3. प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः ।उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।
4. 1 - 24 प्रश्नेभ्यः परमतः 40 अङ्काः कल्पिताः ।

**I . प्रश्नानां प्रत्येकम् एकैकः अङ्कः ।**

**भागः 1.**

**( 1 - 6 ) चतुर्णां समुचितम् उत्तरं कोष्ठकात् चित्वा लिखत ।** **( 4X1=4)**

1. सस्यानि प्रमुखतया कतिविधानि भवन्ति?
   ( त्रिधा, चतुर्धा, पञ्चधा )
2. दुर्योधनकृतं पाण्डवद्रोहं पश्यन् कः धृतराष्ट्रं उपेतवान् ?
   ( विदुरः, भीष्मः, व्यासः )
3. सर्वधेनूनां माता का ?
   ( सरमा, सुरभी, सुरसा )
4. अद्वैतचिन्ताप्रतिष्ठापकः कः ?
   ( श्रीशङ्करः, माधवविद्यारण्यस्वामी, दयानन्दसरस्वती )
5. इदंप्रथमतया वेदानां कालनिर्णयं कर्तुं कः प्रयतितवान् ?
   ( महात्मागान्धी, बालगङ्गाधरतिलक:, डा. एस्. राधाकृष्णः)
6. सर्वेषां प्राणिनां हृदयावर्जकसमर्थं किम् ?
   ( सङ्गीतं, नृत्तं, वाद्यं )

**भागः 2.**

**( 7- 9 ) प्रश्नानां प्रत्येकं एकैकः अङ्कः ।** **( 3X1=3)**

7. क्रिस्तुभागवतस्य कर्ता कः ?

( प्रोफ़. पि सी देवस्या, प्रोफ़. सि पि देवस्या, प्रोफ़. ओ सि देवस्या )

8. पार्वती कस्य पार्श्वे तिष्ठति ?

( पितुः, मातुः, भर्तुः )

9. शाकुन्तलस्य कर्ता कः ?

( भासः, कालिदासः, नलः )

**II . प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।** **( 1X2=2)**

**भागः 1.**

**10. उदाहरणानुसारं यदा - तदा उपयुज्य वाक्यं परिवर्तयत ।**

उदा - जलोपप्लवः आयाति ।

जनाः कष्टम् अनुभवन्ति ।

**यदा** जलोपप्लवः आयाति **तदा** जनाः कष्टम् अनुभवन्ति ।

वृक्षे अनेकानि फलानि सन्ति ।

कानिचित् उपयोगशून्यानि भवन्ति ।

**भागः 2.**

**( 11- 12) प्रश्नानां प्रत्येकं द्वौ अङ्कौ । एकस्य उत्तरं लिखत ।** **( 1X2=2)**

**11. सूचनानुसारं गद्यक्रमं लिखतु ।**

एवं वादिनि देवर्षौ
पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि
गणयामास पार्वती ॥

देवर्षौ. . . . . पार्वती . . . . . पार्श्वे . . . . . लीलाकमलपत्राणि . . . . . ।

**12. " स्वधर्माचरणं जनतासमक्षं मा कुरुत " इत्याशययुक्तं श्लोकं चित्वा लिखतु ।**

i. यूयं स्वधर्माचरणं परेषा-
मालोकनार्थं जनतासमक्षम् ।
मा कार्ष्ट नाकस्थपितुर्न लभ्यो
यद्येवमुत्तुङ्गकृपाप्रसादः ।।

ii. भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा ।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी ।।

**III. ( 13- 16) प्रश्नानां प्रत्येकं त्रयः अङ्काः । त्रयाणाम् उत्तरं लिखत । ( 3X3=9)**

**भागः 1.**

**13. i. उदाहरणानुसारं पदच्छेदं लिखत ।**

व्यायामश्च - व्यायामः+ च । ( एवं चेत्)

धर्मश्च. . . . . . . . . . . ।

**ii. उदाहरणानुसारं विग्रहं लिखत ।**

साश्चर्यम् - आश्चर्येण सह वर्तते इति । ( एवं चेत्)

सादरम् - . . . . . . . . . ।

**iii. अधोदत्तवाक्यात् सम्बोधनापदं चित्वा लिखत ।**

" हे मातः! भिक्षां देहि । इति शङ्करः ताम् अवदत् ।

**14. शतृशानजन्तरूपाणि विविच्य पट्टिकां कुरुत ।**

| |
|---|
| गच्छन्, गम्यमानः, प्रेरयन्, जल्पमानः, कम्पमानः, रुदन् |

**15. उदाहरणानुसारं पट्टिकां पूरयत ।**

| लट् | लङ् |
|---|---|
| पठति | .............. |
| .............. | अवदत् |
| भवति | .............. |

**16. यथोचितं योजयत ।**

अव्यक्तपुष्पः - ओषधिः ।

प्रतानैः प्रसारिता - वनस्पतिः ।

फलपाकान्ता - वीरुत् ।

**भागः 2.**

**प्रश्नानां प्रत्येकं त्रयः अङ्काः ।** (1X3=3)

**17. अधोदत्तवाक्यात् क्त्वान्त- तुमुन्नन्त- ल्यबन्तरूपाणि विविच्य लिखत ।**

सुमेशः नगरं गत्वा मित्रैः सम्मिल्य समुद्रतीरं गन्तुं इच्छति ।

**IV . (18- 20) प्रश्नानां प्रत्येकं चत्वारः अङ्काः । प्रश्नेभ्यः द्वयोः उत्तरं लिखत ।**

**भागः 1.** (2X4=8)

**18. श्लोकं पठित्वा प्रश्नानां उत्तराणि लिखत ।**

अमुना वचनेन तोषिता
कमला तद्वनं समन्ततः ।
कनकामलकैरपूरय-
ज्जनताया हृदयं च विस्मयैः ।।

i. अमुना वचनेन तोषिता का ?

ii. जनतायाः हृदयं कैः अपूरयत् ?

iii. लक्ष्मी इत्यर्थकं पदं श्लोकात् चित्वा लिखत ।

iv. अस्मिन् श्लोके क्रियापदं किम् ?

**19. सूचनानुसारं जीवनचरितं लिखत ।**

**सूचना -**

नाम - श्री नारायणगुरु: ।

जननम् - तिरुवनन्तपुरे चेम्पषन्ति ग्रामे ।

पितरौ - माटनाशान्, कुट्टियम्मा ।

प्रवर्त्तनमण्डलम् - सामाजिकपरिष्कर्ता, सन्यासिवर्य:, समाजोद्धारक: ।

कृतयः - दर्शनमाला, आत्मोपदेशशतकम्, दैवदशकम् इत्यादय: ।

देहवियोगः - 1928 सेप्तंबर् 21 ।

**20. यथोचितं पट्टिकां पूरयत**

| **कृतीनां नाम** | **विभागः** | **कर्ता** |
|---|---|---|
| . . . . . . . . . . . . . . | महाकाव्यम् | कालिदासः |
| रामायणम् | . . . . . . . . . . . . | वाल्मीकिः |
| वृक्षायुर्वेदः | आयुर्वेदः | . . . . . . . . . . . |

**भागः 2.**

**( 21- 22) प्रश्नानां प्रत्येकं चत्वारः अङ्काः । प्रश्नेभ्यः एकस्य उत्तरं लिखत ।**

**( 1X4=4)**

**21. सूचनाः उपयुज्य लघूपन्यासं लिखत ।**

सूचनाः - संस्कृतसाहित्यम् - दृश्यश्रव्यकाव्यानि - नाटकं रम्यं - अभिज्ञानशाकुन्तलं - नायकः दुष्यन्तः- नायिका शकुन्तला - तेषाम् अनुरागः- गान्धर्वविधिः - कण्वस्य यात्रानुमतिः ।

**22 . खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखत ।**

मणिप्पूर् राज्ये लब्धजन्मा एम् सि मेरी कोम् लोकप्रसिद्धा मल्लक्रीडालुः ( Boxer ) भवति । ओलिम्बिक्स् स्पर्धायां मल्लक्रीडाविभागे रजतपतकं प्राप्ता प्रथमभारतीयवनिता चेयं महाभागा ।

कर्षकदम्पत्योः पुत्रीयं वनिता इच्छाशक्त्या कठिनप्रयत्नैः च ईदृशमौन्नत्यं सम्पादितवती । प्रसिद्धस्य मल्लक्रीडालोः डिङ्कोसिंहस्य विजयेन प्रचोदिता इयं पद्मभूषण् , राजीव् गान्धी खेल् रत्ना , पद्मश्री, अर्जुनपुरस्कारः इत्यादिभिः सम्मानिता वर्त्तते ।

**प्रश्नाः -**

१) एम् सि मेरी कोम् कस्य विजयेन प्रचोदिता आसीत् ?

२) एम् सि मेरी कोम् कथम् औन्नत्यं सम्पादितवती ?

३) एम् सि मेरी कोम् कुत्र जनिमलभत ?

४) एम् सि मेरी कोम् महाभागायै राष्ट्रेण सम्मानिताः पुरस्काराः के ?

**V. ( 23- 24) प्रश्नानां प्रत्येकं पञ्च अङ्काः । प्रश्नेभ्यः एकस्य उत्तरं लिखत ( 1X5=5)**

**23. प्रादेशिकभाषायां विवर्तयत ।**

आधुनिकभारतस्य शिल्पिः भवति जबहरलाल् नेहरु महाशयः । सः 1889 वर्षे नवम्बर् मासे 14 तमे दिने जनिमलभत । तस्य पिता मोत्तिलाल नेहरु भवति । मातुः नाम स्वरूपाराणी । सः स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रिपदं स्वीकृत्य राज्यशासनं कृतवान् ।

**24.** उपदेशात्मिकाभिः कथाभिः सम्पुष्टं भवति महाभारतम् । दुर्योधनकृतं पाण्डवद्रोहं पश्यन् व्यासः धृतराष्ट्रमुपेत्य दीनाः पाण्डवाः सविशेषश्रद्धामर्हन्ति इत्युपदिशति । भाषणमध्ये कथामेकाञ्च कथयति । महाभारतस्य वनपर्वान्तर्गता कथेयं दीनानुकम्पां प्रतिपादयति । न केवलं समाजेषु किन्तु परिवारेष्वपि व्यक्तिभेदः दरीदृश्यते ।

********************************